# श्रीमद् भागवत रसिक कुटुंब

## मीनाक्षीपञ्चरत्नम्

उद्यद्भानुसहस्रकोटिसदृशां(ङ्) केयूरहारोज्ज्वलां(वँ्),
विम्बोष्ठीं स्मितदंतपंक्तिरुचिरां पीतांबरालंकृताम् ।
विष्णुब्रह्मसुरेंद्रसेवितपदां(न्) तत्त्वस्वरूपां शिवां,
मीनाक्षीं प्रणतोऽस्मि संततमहं(ङ्) कारुण्यवारांनिधिम् ॥ 1 ॥

मुक्ताहारलसत्किरीटरुचिरां पूर्णेंदुवक्त्रप्रभां,
शिंजन्नूपुरकिंकिणीमणिधरां पद्मप्रभाभासुराम् ।
सर्वाभीष्टफलप्रदां(ङ्) गिरिसुतां(वँ्) वाणीरमासेवितां,
मीनाक्षीं प्रणतोऽस्मि संततमहं(ङ्) कारुण्यवारांनिधिम् ॥ 2 ॥

श्रीविद्यां शिववामभागनिलयां ह्रींकारमंत्रोज्ज्वलां,
श्रीचक्रांकितबिंदुमध्यवसतिं श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं,
मीनाक्षीं प्रणतोऽस्मि संततमहं(ङ्) कारुण्यवारांनिधिम् ॥ 3 ॥

श्रीमत्सुंदरनायिकां भयहरां(ञ्) ज्ञानप्रदां(न्) निर्मलां,

श्यामाभां(ङ्) कमलासनार्चितपदां(न्) नारायणस्यानुजाम् ।
वीणावेणुमृदंगवाद्यरसिकां(न्) नानाविधामंबिकां,
मीनाक्षीं प्रणतोऽस्मि संततमहं(ङ्) कारुण्यवारांनिधिम् ॥ 4 ॥

नानायोगिमुनींद्रहृत्सुवसतिं(न्) नानार्थसिद्धिप्रदां(न्),
नानापुष्पविराजितांघ्रियुगलां(न्) नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्परतरां(न्) नानार्थतत्वात्मिकां,
मीनाक्षीं प्रणतोऽस्मि संततमहं(ङ्) कारुण्यवारांनिधिम् ॥ 5 ॥

॥इति श्रीमत्छंकराचार्यकृतम् मीनाक्षीपंचरत्नम् संपूर्णम्॥